# CLASS NOTES

CLASS नवमी DATE 27/01/2021

SUBJECT संस्कृतम् TOPIC घटनाक्रम

अधोलिखितवाक्यानि घटनाक्रमानुसारं संयोज्य पुनर्लिखत -

(1)

1. सा सखीभिः सह तीर्थयात्रायै काशीविश्वनाथमन्दिरं प्रति गच्छति ।
2. उभौ नन्दिन्याः सर्वविधपरिचर्यां कुरुतः ।
3. उमा मासान्ते उत्सवार्थं दुग्धस्य आवश्यकताविषये चन्दनं सूचयति ।
4. मल्लिका पूजार्थं मोदकानि रचयति ।
5. उत्सवदिने यदा दोग्धुं प्रयत्नं करोति तदा नन्दिनी पादेन प्रहरति ।
6. कार्याणि समये करणीयानि इति चन्दनः नन्दिन्याः पादप्रहारेण अवगच्छति ।
7. चन्दनः उत्सवसमये अधिकं दुग्धं प्राप्तुं मास पर्यन्तं दोहनं न करोति ।
8. चन्दनस्य पत्नी तीर्थयात्रां समाप्य गृहं प्रत्यागच्छति

(2)

1. तस्मै ज्ञानदातुम् इन्द्रः वेशं परिवर्त्य तस्य समीपम् अगच्छत् ।
2. इदं श्रुत्वा तपोदत्तः विद्यां प्राप्तुं गुरुकुलम् अगच्छत् ।
3. तदा तपोदत्तः इदं दृष्ट्वा तस्य उपहासं करोति ।
4. एकः तपोदत्तः तपस्यारतः बालकः आसीत् ।
5. सः कथयति - भोः ! कथमेतत् व्यर्थमेव सिकताभिः सेतुनिर्माणं करोषि ।
6. इन्द्रः अवदत् - "यदि तपसा एव त्वं विद्याः प्राप्स्यसि तर्हि अहमपि सिकताभिः सेतुनिर्माणं करिष्यामि ।

7. सः पुरुषः गंगायाः सिकताभिः सेतुनिर्माणम् आरभत।
8. सः विद्या प्राप्त्यै अध्ययनं न कृत्वा केवलं तपः एव अकरोत् ।

③ 1. एकदा एकः तन्द्रालुः बालः आसीत् ।
2. सः बालः भग्नमनोरथः चिन्तितवान् - 'कथं अस्मिन् जगति प्रत्येकं जनाः स्वकार्येषु निमग्नाः सन्ति ।
3. हे मनुष्याणां मित्र कुक्कुर! अस्मिन् निदाघे तरुमूले मया सह खेलिष्यसि ?
4. सः अगायत् - वयं हि मधुसंग्रहे व्यग्राः स्मः इति
5. सः पुष्पोद्याने व्रजन्तं मधुकरं दृष्ट्वा तं क्रीडाहेतोः आह्वयत् ।
6. अयि चटकपोत! मानुषस्य मम मित्रं भविष्यसि किम् ?
7. ततः प्रभृति सः विद्याभ्यासं कृत्वा वैदुषीं प्रथां सम्पत्तिं च अलभत ।
8. मम स्वामी पुत्रप्रीत्या मां पोषयति अतः अहं तस्य सेवायाः भ्रष्टः न भविष्यामि ।

④ 1. बालिका सूर्योदयात् पूर्वम् एव तत्र उपस्थिता अभवत्।
2. यदा मञ्जूषां सा उद्घाटितवती तदा तस्यां महार्हाणि हीरकाणि दृष्ट्वा सा प्रसन्ना जाता ।
3. यदा काकः शयित्वा प्रबुद्धः जातः तदा सः स्वर्ण गवाक्षात् अवदत् ।
4. कस्मिंश्चिद् ग्रामे एका धनहीना वृद्धा स्त्री अवसत् ।
5. बालिका अकथयत् - अहं ताम्रस्थाल्यामेव भोजनं करिष्यामि ।
6. बालिके! त्वम् आगता ? तिष्ठ, अहं तवकृते सोपानम् अवतारयामि ।
7. सा काकं भर्त्सयन्ती अवदत् ।

8 परं स्वर्णसोपानेन सा स्वर्णभवनम् अगच्छत् ।

5 1 लोभाविष्टा सा बृहत्तमां मञ्जूषां गृहीतवती ।
2. इति उक्त्वा काक: कक्षाया: अभ्यन्तरात् तिस्र: मञ्जूषा: निस्सारयत् ।
3. भो नीचकाक! अहम् आगता अस्मि, मह्यम् तण्डुलमूल्यं यच्छ ।
4. किञ्चित् कालात् अनन्तरं एक: विचित्र: काक: तत्र समुपाजगाम ।
5. एकस्या: वृद्धाया: एका विनम्रा मनोहरा च कन्या आसीत् ।
6. कन्या प्रावोचत् - अहं निर्धनमातु: कन्या अस्मि । अत: ताम्रसोपानेन एव आगमिष्यामि ।
7 तस्मिन्नेव ग्रामे एका अपरा लुब्धा वृद्धा स्त्री अवसत् ।
8. एकदा सा पुत्रीम् आदिदेश - सूर्यातपे तण्डुलान् खगेभ्यो त्वं रक्ष ।

6 1 भो नीचकाक! अहम् आगता अस्मि, मह्यं तण्डुलानां मूल्यं यच्छ ।
2. गृहम् आगत्य यदा सा मञ्जूषाम् उद्घाटयति तदा तस्मिन् एकं कृष्णसर्पम् अपश्यत् ।
3 तदनन्तरं सा लोभम् अत्यजत् ।
4. तस्मिन् एव ग्रामे एका लुब्धा वृद्धा अपि अवसत् ।
5. गर्विता बालिका अवदत् - अहं स्वर्णमयेन सोपानेन एव आगमिष्यामि ।
6. लुब्धया कन्यया लोभस्य फलं प्राप्तम् ।
7. तस्या: अपि एका ईर्ष्यालु: कन्या अपि आसीत् ।
8. सूर्यातपे सापि तण्डुलान् निक्षिप्य स्वसुतां तेषां रक्षार्थं नियुक्तवती ।